## षढोः कः सि। (४१/२९७)

षकारढकारयोः ककारादेशो भवति सकारे परतः। षकारस्य – पिष् –पेक्ष्यति अपेक्ष्यत्। पिपक्षति। ढकारस्य -- लिह् -- लेक्ष्यति। अलेक्ष्यत्। लिलिक्षति। सि इति किम्? पिनष्टि। लेढि॥

## रदाभ्यां निष्ठातो नः पूर्वस्य च दः। (४२/३०१६)

रेफदकाराभ्यामुत्तरस्य निष्ठातकारस्य नकारः आदेशो भवति [1]पूर्वस्य च दकारस्य। [2]रेफान्तात् तावत् – आस्तीर्णम्। [3]विस्तीर्णम्। [4]विशीर्णम्। निगीर्णम्। अवगूर्णम्। दकारात् – भिन्नः। भिन्नवान्। छिन्नः। छिन्नवान्। रदाभ्याम् इति किम्? कृतः। कृतवान्। रः इत्यत्र रश्रुतिसामान्यं नोपादीयते, किं तर्हि, [5]व्यञ्जनमात्रम्। [6]रेफसामान्यनिर्देशेऽपि सति रेफात् परा [7]याऽज्भक्तिस्तद्व्यवधानान्नत्वं न भवति। निष्ठा इति किम्? कर्ता। हर्ता। तः इति किम्? चरितम्। मुदितम्। पूर्वस्य इति किम्? परस्य मा भूत्, भिन्नवद्भ्याम्। भिन्नवद्भिः। इह[8] कृतस्यापत्यं कार्तिः इति[9] वृद्धेः [10]बहिरङ्गलक्षणाया असिद्धत्वान्नत्वे कर्तव्ये रेफस्यासिद्धत्वम्॥

## संयोगादेरातो धातोर्यण्वतः। (४३/३०१७)

संयोगादिः यो धातुराकारान्तो यण्वान्, तस्मादुत्तरस्य निष्ठातकारस्य नकारादेशो भवति। प्रदाणः। प्रदाणवान्। म्लानः। म्लानवान्। [11]संयोगादेः इति किम्? यातः। यातवान्। आतः इति किम्? च्युतः। च्युतवान्। प्लुतः। प्लुतवान्। धातोः इति किम्? निर्यातः। [12]निर्वातः। यण्वतः इति किम्? स्नातः। [13]स्नातवान्॥

## ल्वादिभ्यः। (४४/३०१८)

'लूञ् छेदने' (धा.पा. १४८४) इत्येतत्प्रभृति 'वृञ् वरणे' (धा. पा. १४८७) इति यावत् वृत्करणेन [14]समापिता ल्वादयो गृह्यन्ते। तेभ्यः उत्तरस्य निष्ठातकारस्य नकारादेशो भवति। लूनः। लूनवान्। [15]धूनः। धूनवान्[16]। जीनः। जीनवान्।

[९१९] ऋकारल्वादिभ्यः क्तिन्निष्ठावद्भवतीति वक्तव्यम्। (म. भा. ३. ४०७)

कीर्णिः। गीर्णिः। शीर्णिः। लूनिः। पूनिः।

---

1. पूर्वदकारस्य क. इ. 2. रेफात् क. 3. नास्ति इ. 4. विकीर्णम् ड. 5. व्यञ्जनमर्धमात्रकम् क. 6. सामान्यनिर्देशेऽपि क. 7. अज्विभक्तिः इ. 8. तु इत्यधिकम् ह. 9. लक्षणेऽपि इत्यधिकम् क. 10. बहिरङ्गत्वान्नत्वे कर्तव्ये रेफस्य असिद्धत्वम् क. इ. 11. संयोगात् क. 12. निर्यातवान् क. ब, निर्वातवान् ब 13. नास्ति क. 14. परिमापिताः ड. 15. धूनिः इत्यधिकम् ड. 16. पूतः पूतवान इत्यधिकम ड.